# Shri Durga Sahasranama Stotram

# શ્રીદુર્ગાસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : Durga Sahasranama Stotram from Rudrayamala

File name : durgAsahasranAmastotramrudrayAmala.itx

Category : sahasranAma, devii, stotra, devI

Location : doc_devii

Proofread by : Manish Gavkar

Description-comments : Rudrayamala. See corresponding nAmAvalI

Latest update : June 26, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 26, 2022

*sanskritdocuments.org*

# શ્રીદુર્ગાસહસ્રનામસ્તોત્રમ્

શ્રી ભૈરવ ઉવાચ -
અધુના શ ृણુવક્ષ્યામિ દુર્ગાસર્વસ્વમીશ્વરી ।
રહસ્યં સર્વ દેવાનાં દુર્લભં જન્મિનામપિ ॥ ૧॥

શ્રીદુર્ગાતત્ત્વમુદ્દિષ્ટસારં ત્રૈલોક્યકારણમ્ ।
મન્ત્રનામસહસ્રં ચ દુર્ગાયાઃ પુણ્યદં પરમ્ ॥ ૨॥

યં પઠિત્વા શિવે ધૃત્વા દેવીનામસહસ્રકમ્ ।
ઇહ ભોગી પરત્રાપિ જીવન્મુક્તો ભવેન્નરઃ ॥ ૩॥

ઇદં નામસહસ્રં તે મન્ત્રગર્ભં રહસ્યકમ્ ।
અશ્વમેધાયુતાત્પુણ્યં લોકે સૌભાગ્યવર્ધનમ્ ॥ ૪॥

શ્રેયસ્કરં વિશ્વવન્દ્યં સર્વદેવનમસ્કૃતમ્ ।
ગુહ્યં ગોપ્યતમં દેવિ પઠનાત્ સિદ્ધિદાયકમ્ ॥ ૫॥

અસ્ય શ્રીદુર્ગાસહસ્રનામસ્તોત્રમહામન્ત્રસ્ય શ્રીમહેશ્વર ઋષિઃ,
અનુષ્ટુપ્ છન્દઃ, શ્રીદુર્ગા દેવતા, દું બીજં, હ્રીં શક્તિઃ,
ૐ કીલકં, ધર્માર્થકામમોક્ષાર્થે સહસ્રનામપાઠે વિનિયોગઃ ॥

ધ્યાનમ્-
દૂર્વાનિભાં ત્રિનયનાં વિલસત્કિરીટાં
    શઙ્ખાબ્જખડ્ગશરખેટકશૂલચાપાન્ ।
સન્તર્જનીં ચ દધતીં મહિષાસનસ્થાં
    દુર્ગાં નવારકુલપીઠગતાં ભજેઽહમ્ ॥

ૐ હ્રીં દું જગદમ્બા ભાભદ્રિકા ભદ્રકાલિકા ।
પ્રચણ્ડા ચણ્ડિકા ચણ્ડી ચણ્ડમુણ્ડનિષૂદિની ॥ ૬॥

અનસૂયા ત્રુટિસ્તારા કૃત્તિકા કુબ્જિકા લયા ।
પ્રલયા સ્થિતિઃ સમ્ભૂતિર્વિભૂતિર્ભયનાશિની ॥ ૭॥

મહામાયા મહાવિદ્યા મૂલવિદ્યા ચિદીશ્વરી ।
મદાલસા મદોત્તુઙ્ગામદિરા મદનપ્રિયા ॥ ૮॥

આલિર્વ્યાલપ્રસૂઃ પુણ્યા પવિત્રા પરમેશ્વરી ।
આદિદેવી કલા કાન્તા ત્રિપુરા જગદીશ્વરી ॥ ૯॥

મનોન્મના મહાલક્ષ્મીઃ સિદ્ધલક્ષ્મીઃ સરસ્વતી ।
સરિત્કાદમ્બરી ગોધા ગુહ્યકાલી ગણેશ્વરી ॥ ૧૦॥

ગણામ્બિકા જયા તાપી તપના તાપહારિણી ।
તપોમયી દુરાલમ્બા દુષ્ટગ્રહનિવારિણી ॥ ૧૧॥

દુઃખહા સુખદા સાધ્વી પરમામૃતસૂઃ સુરા ।
સુધા સુધાંશુનિલયાપ્રલયાનલસન્નિભા ॥ ૧૨॥

સમસ્તાસમ્પદમ્ભોજનિલયા કર્ણિકાલયા ।
વિદ્યેશ્વરી વિશ્વમયી વિરાટ્ છન્દો ગતિર્મતિઃ ॥ ૧૩॥

ધૃતિદા(ધૃતિશ્ચ) દામ્ભિકી દોલા લોપામુદ્રા પટીયસી ।
ગરિષ્ઠાઽરિષ્ટહાઽદુષ્ટા કૃપા કાશી કુલાઽકુલા ॥ ૧૪॥

અકુલસ્થા પદન્યાસા ન્યાસરૂપા વિરૂપિણી ।
વિરૂપાક્ષી કોટરાક્ષી કુલકાન્તાઽપરાજિતા ॥ ૧૫॥

અજિતા કુલિકા લમ્પા લમ્પટા ત્રિપુરેશ્વરી ।
ત્રિતયી વેદવિન્યાસા સંન્યાસાસુમતિર્ભયા ॥ ૧૬॥

અભયા સ્વર્મુખા દેવી મહૌષધિરલમ્બુસા ।
ચપલા ચન્દ્રિકા ચણ્ડા ચણ્ડમુણ્ડનિસૂદિની ॥ ૧૭॥

ચાપલાક્ષી મદાવિષ્ટા મદિરારુણલોચના ।
પુરી ત્રિપુરસૂરાસ્ના રસા રામા મનોહરા (રમા) ॥ ૧૮॥

સન્ધ્યા સન્ધ્યાભ્રશીલાચ શાલાશ્યામપયોધરા ।
શશાઙ્કમુકુટા શ્યામા સુરાસુન્દરલોચના ॥ ૧૯॥

વિષમાક્ષી વિશાલાક્ષી વા(વ) શા વાગીશ્વરી શિલા ।
મનઃશિલા ચ કસ્તૂરી મૃગનાભિર્મૃગેક્ષણા ॥ ૨૦॥

મૃગારિવાહનામા(સા)ધ્વી માનદા મત્તભાષિણી ।

નારસિંહી વામદેવી વામા વામશ્રુતિપ્રિયા ॥ ૨૧॥

પુણ્યાપુણ્યગતિઃ પુણ્યા પુત્રી પુણ્યજનપ્રિયા ।
ચામુણ્ડા ચોગ્રચણ્ડા ચ મહાચણ્ડાઽતમાઽતમાઃ ॥ ૨૨॥

તમ(પ)સ્વિનીપ્રભા જ્યોત્સ્ના મહજ્જ્યોતિઃસ્વરૂપિણી ।
સુરૂપા સદ્ગતિઃ(સ્વર્ગતિઃ)સાધ્વી સદસદ્રૂપરાજિતા ॥ ૨૩॥

સૃષ્ટિઃ સ્થિતિઃ ક્ષેમકરી ક્ષમા ક્ષામોન્નતસ્તની ।
ક્ષોણી ક્ષયકરી ક્ષીણા શર્વ(વ)સ્થા શિવવલ્લભા ॥ ૨૪॥

દન્તુરા દાડિમપ્રીતિર્દયા દામ્ભિકસૂદિની ।
રાક્ષસી ડાકિની યોગ્યાયોગિની યોગ(ગિ)વલ્લભા ॥ ૨૫॥

કબન્ધા કન્ધરા કૃષ્ણા(વિદ્યા) કૃત્તિકા કણ્ઠકાન્તકા ।
કલઙ્કરહિતા કાલી કમ્પા કાશ્મીરવલ્લભા ॥ ૨૬॥

કાશી કીર્તિપ્રદા કાઞ્ચિ કાશ્મીરી કોકિલસ્વના ।
પ્રભાવતી મહારૌદ્રી રુદ્રપત્ની રુજાપહા ॥ ૨૭॥

રતિઃ સ્તુતિસ્તરીસ્તુર્યા તોતુલાઽતલવાસિની ।
તપઃપ્રિયા શરચ્છ્રેષ્ઠા પઙ્ગુપુત્રી યમસ્વસા ॥ ૨૮॥

યામી યમાન્તકા યામ્યા યમુના સ્વર્નદી તડિત્ ।
નારાયણી વિશ્વમાતા ભવાની પાપનાશિની ॥ ૨૯॥

વિગતા વિગતપ્રશ્ના કૃષ્ણા કૃષ્ટાસિધારિણી ।
વારી વારા વરધરા વરદા વીરસૂદિની ॥ ૩૦॥

વીરસૂર્વામનાકારા દીર્ઘસૂત્રા દયાવતી ।
દરી ધનપ્રદા ધાત્રી ધાત્રીવલ્લી મહોદરી ॥ ૩૧॥

ગણેશ્વરી ગયા કાઞ્ચી કાઞ્ચીકિઙ્કિણિઘણ્ટિકા ।
માયા માયાવતી મત્તા પ્રમત્તા પ્રવરેશ્વરી ॥ ૩૨॥

પૌરન્દરી શચી શીતા શીતાતપસ્વભાવજા ।
સ્વાભાવિકગુણાગણ્યાગામ્ભીર્યગુણભૂષણા ॥ ૩૩॥

સૂતિઃ સૂર્યકલાસુપ્તા સપ્તસપ્તિસ્વરૂપિણી ।
તેજસ્વિની સદાનન્દા સભાસન્તોષવર્ધિની ॥ ૩૪॥

તર્પણા કર્ષણા હોતા(ત્રી) સઙ્કલ્પાશુભમન્ત્રિકા ।
દર્ભા દ્રોણિકલા શ્રાન્તા સમિદ્ધા સુરવેદિકા ॥ ૩૫॥

ધૂમ્રાહુતિશ્ચરમતિશ્ચામીકરરુચિશ્ચિતા ।
ચિન્તાઽનલેશ્વરી નેલાકરાનીલસરસ્વતી ॥ ૩૬॥

અપર્ણા સુફલા યજ્ઞા સભયા નિર્ભયાઽભયા ।
ભીમસ્વનાભર્ગશિખા ભાસ્વતીભાકરા વિભા ॥ ૩૭॥

વિભાવરી નદી નન્ધા નન્ધાવર્તપ્રવર્તિની ।
પૃથ્વીધરા વિશ્વ(ષ)ધરા વિશ્વગર્ભા પ્રવર્તિકા ॥ ૩૮॥

વિશ્વમાયા વિશ્વમાલા વિશ્વમ્ભરવિલાસિની ।
ઉરગેશા પદ્મનાભા(ગા)પદ્મનાભપ્રસૂઃ પ્રજા ॥ ૩૯॥

તોરણા તુલસી દીક્ષા દક્ષા દાક્ષાયણીદ્યુતિઃ ।
સમ્પુટા શયનાશય્યાશાસનાશમનાન્તકા ॥ ૪૦॥

શ્યામાકવર્ણા શાર્દૂલીશમ્પાશીતાંશુવલ્લભા ।
સ્તુત્યા પ્રણીતા નિયતિઃ કમ્પના કમ્પહારિણી ॥ ૪૧॥

ચમ્પકાભા ચરાચીનાઽદીના દીનજનપ્રિયા ।
વસુન્ધરા વાસવેશી વસુનાથા વટેશ્વરી ॥ ૪૨॥

સમુદ્રા સઙ્ગમા પૂર્ણાઽન્તરાલા તરુવાસિની ।
પાર્વતી પામરી માન્યા માનનીયા મધુપ્રિયા ॥ ૪૩॥

માધવી મધુપાનસ્થા મન્દિરા મન્દુરામૃગી ।
મોમુષા(મુમૂષા) રૂરુષારેવારેવતીરમણી રમા ॥ ૪૪॥

ઋદ્ધિહસ્તા સિદ્ધિહસ્તા અન્નપૂર્ણા મહેશ્વરી ।
અન્નરૂપા જગજ્જ્યોતિઃ સમસ્તાસુરઘાતિની ॥ ૪૫॥

ગારુડીગગનાલમ્બા લમ્બમાનકચપ્રિયા ।
પીતામ્બરા પીતપુષ્પા પૂતના ગીતવલ્લભા ॥ ૪૬॥

બલાકા જગદન્તાચ જરા જયવરપ્રદા ।
પ્રીતિઃ કઠોરવદના કરાલરદના રસા ॥ ૪૭॥

જિહ્વાહસ્તાચ બગલા પ્રણયા વિનયપ્રદા ।
કિરી કરાલવપુષી શેમુષી મક્ષિકા મષી ॥ ૪૮॥

ઉત્તીર્ણાતર્ણિકા તીક્ષ્ણા શ્લક્ષ્ણા કામેશ્વરી શિવા ।
શિવપત્ની સરોજાક્ષી પદ્મહસ્તા સરસ્વતી ॥ ૪૯॥

કમલાક્ષી કમલજા કરવાલવિહારિણી ।
કવિપૂજ્યા કવિગતિઃ કવિરૂપા કવિપ્રિયા ॥ ૫૦॥

કદલી કદલીરૂપા કદલીવનવાસિની ।
કલપ્રીતા કલહદા કલહા કલહાતુરા ॥ ૫૧॥

કસ્તૂરીમૃગસંસ્થાચ કસ્તૂરીમૃગરૂપિણી ।
કઠોરા કરમાલાચ કઠોરકુચધારિણી ॥ ૫૨॥

યજ્ઞમાતા યજ્ઞભોક્ત્રી યજ્ઞેશી યજ્ઞસમ્ભવા ।
યજ્ઞસિદ્ધિઃ ક્રિયાસિદ્ધિર્યજ્ઞાઙ્ગી યજ્ઞરક્ષિકા ॥ ૫૩॥

વૈષ્ણવી વિષ્ણુરૂપા ચ વિષ્ણુમાતૃસ્વરૂપિણી ।
વિષ્ણુમાયા વિશાલાક્ષી વિશાલનયનોજ્જ્વલા ॥ ૫૪॥

શિવમાતા શિવાખ્યાચ શિવદા શિવરૂપિણી ।
ગાયત્રી ચૈવ સાવિત્રી બ્રહ્માણી બ્રહ્મરૂપિણી ॥ ૫૫॥

દુર્ગસ્થા દુર્ગરૂપાચ દુર્ગા દુર્ગતિનાશિની ।
માહેશ્વરીચ સર્વાધા શર્વાણી સર્વમઙ્ગલા ॥ ૫૬॥

સૂર્યકોટિસહસ્રાભા ચન્દ્રકોટિનિભાનના ।
સમુદ્રકોટિગમ્ભીરા વાયુકોટિમહાબલા ॥ ૫૭॥

સોમસૂર્યાગ્નિમધ્યસ્થા મણિમણ્ડલવાસિની ।
દ્વાદશારસરોજસ્થાસૂર્યમણ્ડલવાસિની ॥ ૫૮॥

અકલઙ્કશશાઙ્કાભા ષોડશારનિવાસિની ।
હૃત્પદ્મનિલયાઽભીમા મહાભૈરવનાદિની ॥ ૫૯॥

વર્ણાઢ્યા વર્ણરહિતા પઞ્ચાશદ્વર્ણભેદિની ।
ભવાની ભૂતિદા ભૂતિર્ભૂતિદાત્રી ચ ભૈરવી ॥ ૬૦॥

ભૈરવાચારનિરતા ભૂતભૈરવસેવિતા ।
કામેશ્વરી કામરૂપા કામતાપવિમોચિની ॥ ૬૧॥

ગણેશજનની દેવીગણેશવરદાયિની ।

ગતિદા ગતિહા ગીતા ગૌતમી ગુરુસેવિતા ॥ ૬૨॥

દીનદુઃખહરા દીનતાપનિર્મૂલકારિણી ।
દયાશીલા દયાસારા દયાસાગરસંસ્થિતા ॥ ૬૩॥

નૃત્યપ્રિયા નૃત્યરતા નર્તકી નર્તકપ્રિયા ।
નારાયણી નરેન્દ્રસ્થા નરમુણ્ડાસ્થિમાલિની ॥ ૬૪॥

ભૈરવી ભૈરવારાધ્યા ભીમા ભીમવરપ્રદા ।
ભુવના ભુવનારાધ્યા ભવાની ભૂતિવર્ધિની ॥ ૬૫॥

મહિષાસુરહન્ત્રી ચ રક્તબીજવિનાશિની ।
ધનુર્બાણધરા નિત્યા ધૂમ્રલોચનનાશિની ॥ ૬૬॥

કુલીના કુલમાર્ગસ્થા કુલમાર્ગપ્રકાશિની ।
પઞ્ચાશદ્વર્ણબીજાઢ્યા પઞ્ચાશન્મુણ્ડમાલિકા ॥ ૬૭॥

ષડઙ્ગયુવતીપૂજ્યા ષડઙ્ગરૂપવર્જિતા ।
કાલમાતા કાલરાત્રિઃ કાલી કમલવાસિની ॥ ૬૮॥

કમલા કાન્તિરૂપાચ કામરાજેશ્વરી ક્રિયા ।
માયા મતિર્મહામાયા ભયદા ભયહારિકા ॥ ૬૯॥

નારી નારાયણી ગણ્યા નારાયણગૃહપ્રિયા ।
મદિરાપાનસન્તુષ્ટા મદિરામોદધારિણી ॥ ૭૦॥

તથ્યા પથ્યા કૃતી રથ્યા રથસ્થા વિતતસ્વરા ।
મહતી રાગિણી ભાર્ગી શુચિહાસા હરીશ્વરી ॥ ૭૧॥

હરિદ્રત્નાંશુલસિતા લક્ષ્મીનાયકસુન્દરી ।
અમ્બાલિકાઽમ્બા દેવેશી અનઘાઽગ્નિશિખા શ્રુતિઃ ॥ ૭૨॥

અલસાઽલ્પગતિશ્ચાન્ત્યાઽનન્તાઽનન્તગુણાઽશ્રયા ।
આદ્યા ચાદિત્યસઙ્કાશા આદિત્યકુલસુન્દરી ॥ ૭૩॥

આત્મરૂપાઽઽધિશમનીઆદિમાયાઽઽદિદેવતા ।
ઇન્દ્રપ્રસૂરિન્દ્યોતિરિનાગ્નિશશિલોચના ॥ ૭૪॥

ઇન્દ્રાવરજસંસ્તુત્યા ઇલાચેક્ષુરસપ્રિયા ।
ઈશ્વરી ઈશવનિતા ઈશા કેશવવલ્લભા ॥ ૭૫॥

ઉમા ઉર્વી ઉરુભુજા ઉત્તુઙ્ગા ચોક્ષવાહના ।
ઉત્તઙ્કા ચોત્તમા ધ્યેયા ઉલ્લાસાચોરુગર્વિણી ॥ ૭૬॥

ઉષ્માઊણા ચ ગુર્વઙ્ગી ઊર્ધ્વાક્ષી ઊર્ધ્વમસ્તકા ।
ઋદ્ધિરૃચા ઋવર્ણેશી ઋણહર્ત્રી ઋચાન્તકી ॥ ૭૭॥

ૠઢિજા ચારુવસ્ત્રાચ ૠણિવાસા મહાલયા ।
લૃકારા લૃક્કુરા લીના લૃકારા વરધારિણી ॥ ૭૮॥

એણાઙ્કમુકુટા ચેહા ચારુચન્દ્રકલા કલા ।
ઐકારગતિરૈશ્વર્યદાયિની ચૈશ્વરીગતિઃ ॥ ૭૯॥

ઓઙ્કારા બીજરૂપા ચ ઔત્રિકી વેત્રધારિણી ।
અમ્બિકા લમ્પિકા પમ્પા અઃ સ્વરોદ્ધારરૂપિણી ॥ ૮૦॥

કાલીચ ભદ્રકાલી ચ કાલિકા કાલવલ્લભા ।
કદમ્બનિલયા કન્થા(ન્યા) કાઞ્ચીમણ્ડનમણ્ડિતા ॥ ૮૧॥

કલઙ્કરહિતા કૂર્મા કાઞ્ચનાભા કરીરગા ।
કનકાચલવાસાચ કારુણ્યાકુલમાનસા ॥ ૮૨॥

કુલસ્થા કૌલિની કુલ્યા કુરુકુલ્લા કપાલિની ।
કપાલકુલનિર્વિણ્ણા ક્લીઙ્કારા કઞ્જલોચના ॥ ૮૩॥

ખઞ્જનાક્ષી ખડ્ગધરા ખેટકાયુધભૂષણા ।
ખર્પરાઢ્યા ચ ખલહા ખેટિની ખેચરી ખગા ॥ ૮૪॥

ખગાયુધા ખગગતિઃ ખકારાક્ષરભૂષણા ।
ગણાધ્યક્ષાગજગતિર્ગણેશજનનીગદા ॥ ૮૫॥

ગોધા ગદાધર પ્રાજ્યાગગનેશી મહીમલા ।
ઘુર્ઘરા ઘટભૂર્ઘૂકા ઘુસૃણાભા ગણેશ્વરી ॥ ૮૬॥

ઘનસારપ્રિયા સામ્યા ઘવર્ણકૃતભૂષણા ।
ઙાન્તાઙવર્ણમુકુટા કવર્ગકૃતભૂષણા ॥ ૮૭॥

ચાન્દ્રી ચાન્દ્રિસ્તુતા ચાર્વી ચન્દ્રિકા ચણ્ડનિઃસ્વના ।
ચઞ્ચરીકસ્વના દેવી ચઞ્ચચ્ચામીકરાઙ્ગદા ॥ ૮૮॥

છત્રિકા છુરિકા છઞ્છા છત્રચામરભૂષણા ।
જઙ્કારીજલજિહ્વાચજૃમ્ભિકાજલયોગિની ॥ ૮૯॥

જટાજૂટધરાજાતિર્જાતીપુષ્પસમાનના ।
જલેશ્વરીજગદ્ધ્યેયા જાનકી જનની જટા ॥ ૯૦॥

ઝઞ્ઝા ઝરી ઝરત્કારી ઝણત્કાઞ્ચીરકિઙ્કુણી ।
ઝિણ્ઠિકા ઝમ્પકૃદ્ ઝમ્પા ઝમ્પત્રાસનિવારિણી ॥ ૯૧॥

ઞાણુરૂપાઞઙ્કુહસ્તા ઞવર્ણાક્ષરસમ્મતા ।
ટઙ્કાયુધા મહાતથ્યા ટઙ્કારકરુણા ટસી ॥ ૯૨॥

ઠકુરા ઠત્કરા ઠાની ડિણ્ડીરવસના ઢલા ।
ઢણ્ઢાનિલમયી ઢણ્ડા ઢણત્કારકરા ઢસા ॥ ૯૩॥

ણાન્તાણીલાયુધાણમ્રાણવર્ણાક્ષરભૂષણા ।
તરુણી તુન્દિલા તોન્દા તામસી તામસપ્રિયા ॥ ૯૪॥

તામ્રાનના તામ્રકરાતામ્રામ્બરધરા તુલા ।
તાપત્રયહરા તાપી તૈલાસક્તા તિલોત્તમા ॥ ૯૫॥

સ્થાણુપત્નીસ્થલી સ્થૂલા સ્થિતિઃ સ્થૈર્યધરા સ્થુલા ।
દન્તિની દન્તુરા દાર્વી દેવકી દેવનાયિકા ॥ ૯૬॥

દમિની શમિની દણ્ડયા દણ્ડહસ્તા દુરાનતિઃ ।
દુર્વારા દુર્ગતિર્દાક્ષી દ્રાક્ષા દ્રાવિડવાસિની ॥ ૯૭॥

દૂરસ્થા દુન્દુભિધ્વાના દરદા દરનાશિની ।
દુઃખઘ્ની દ્રુતગાઽદુષ્ટા દયા દામ્ભિક્યનાશિની ॥ ૯૮॥

ધર્મ્યા ધર્મપ્રસૂર્ધન્યા ધનદા ધાતૃવલ્લભા ।
ધનુર્ધરા ધનુર્વલ્લી ધાનુષ્કવરદાયિની ॥ ૯૯॥

ધૂમાલી ધૂમ્રવદનાધૂમશ્રીર્ધૂમ્રલોચના ।
નલિની નર્તકી નાન્તા નઙ્ગા નલિનલોચના ॥ ૧૦૦॥

નિર્મલા નિગમાચારા નિમ્નગાનગજા નિમિઃ ।
નીલગ્રીવા નિરીહાચ નીપોપવનવાસિની ॥ ૧૦૧॥

નિરઞ્જના નિજાજન્યા નિદ્રાલુર્નીરવાસિની ।
નટિની નાટ્યનિરતા નવનીતપ્રિયાઽનિલા ॥ ૧૦૨॥

નારાયણી નિરાકારા નિર્લેપા નિત્યવલ્લભા ।

પદ્માવતી પદ્મકરા પુત્રદા પુત્રવત્સલા ॥ ૧૦૩॥

પરોત્તરા પુરી પાઠા પીનશ્રોત્રાપુલોમજા ।
પુષ્પિણી પુસ્તકકરા પટુઃ પાઠીનવાહના ॥ ૧૦૪॥

પાપઘ્ની શમ્પિની (પુષ્પિણી) પાલી પલ્લી પરમસુન્દરી ।
પિશાચીચ પિશાચઘ્ની પાનપાત્રધરાપુટા ॥ ૧૦૫॥

પૂર્ણિમા પઞ્ચમી પૌત્રી પુરૂરવવરપ્રદા ।
પઞ્ચયજ્ઞા પશ્વશરી પઞ્ચાશતિમનુપ્રિયા ॥ ૧૦૬॥

પાઞ્ચાલી પઞ્ચમુદ્રાચ પૂજા પૂર્ણમનોરથા ।
ફલિની ફલદાત્રીચ ફલ્ગુહસ્તા ફણિપ્રિયા ॥ ૧૦૭॥

ફિરઙ્ગહા સ્ફીતમતિઃ સ્ફીતિઃ સ્ફીતિમતી સ્ફુરા ।
બલમાયા બલસ્તુત્યા બિલ્વસેના બલાડબલા ॥ ૧૦૮॥

બગલેશ્વરપૂજ્યા ચ બલિની બલવર્ધિની ।
બુદ્ધમાતા બૌદ્ધમતિર્બદ્ધા બન્ધનમોચિની ॥ ૧૦૯॥

ભગિની ભગમાલાચ ભગલિઙ્ગામૃતદ્રવા ।
ભીમેશ્વરીચ ભેરુણ્ડા ભગેશી ભગસર્પિણી ॥ ૧૧૦॥

ભગલિઙ્ગસ્થિતાભગ્યા ભાગ્યદાભગમાલિની ।
મત્તા મનોહરા મીના મૈનાકજનની મુરી ॥ ૧૧૧॥

મુરલી માનવી હોત્રી મહસ્વિજનમોદિતા ।
મત્તમાતઙ્ગગામાદ્રી મરાલગતિરઞ્ચલા ॥ ૧૧૨॥

યક્ષેશ્વરેશ્વરી યજ્ઞા યજુર્વેદપ્રિયાશ્રિતા ।
યશોવતી યતિસ્થા ચ યતાત્મા યતિવલ્લભા ॥ ૧૧૩॥

યવની યૌવનસ્થાચ યવા યક્ષજનાશ્રયા ।
યજ્ઞસૂત્રપ્રદા જ્યેષ્ઠા યજ્ઞભૂર્યૂપમૂલિની ॥ ૧૧૪॥

રઞ્જિતારાજપત્ની ચ રાજસૂયફલપ્રદા ।
રજોવતી રજશ્ચિત્રારાજ્યદા રાજ્યવર્ધિની ॥ ૧૧૫॥

રાજ્ઞી રાત્રિઞ્ચરેશાની રોગઘ્ની ત્રિપુરેશ્વરી ।
લુલિતા લતિકા લાપ્યા લોપાલલનલાલસા ॥ ૧૧૬॥

લાટીરદ્રુમવાસાચ લાટીરદ્રુમવર્તિની ।
લઙ્ગાલલજ્જટાજૂટા લઙ્ઘિતા લોકસુન્દરી ॥ ૧૧૭॥

લોકેશવરદાલેયા લયકર્ત્રી મહાલયા ।
વેદિર્વિલગ્નાવારી ચ વીણા વેણુર્વનેશ્વરી ॥ ૧૧૮॥

વન્દમાના વવર્ણાઢ્યા વારાહી વીરમાતૃકા ।
શઙ્ખિની શઙ્ખવલયા શઙ્ખાયુધધરાશમા ॥ ૧૧૯॥

શશિમણ્ડલમધ્યસ્થા શીતલામ્બુનિવાસિની ।
શ્મશાનસ્થા મહાઘોરા શ્મશાનનિલયેશ્વરી ॥ ૧૨૦॥

સિન્ધુઃ સૂત્રધરા સત્રા સમસ્તકુલચારિણી ।
સપ્તમી સાત્ત્વિકી સત્ત્વા સત્રસ્થાઽસુરસૂદિની ॥ ૧૨૧॥

સુરેશ્વરીસમ્પદાઢ્યા સમસ્તાચલચારિણી ।
સમદા સમ્મિતિઃ સમ્મા સવના સવનેશ્વરી ॥ ૧૨૨॥

હંસી હરપ્રિયા હાસ્યા હરિનેત્રા હરામ્બિકા ।
હેષા હટેશ્વરી હેરા હલિની હલદાયિની ॥ ૧૨૩॥

હેહા હાહારવા હાલા હાલાહલહતાશયા ।
ક્ષમા ક્ષેમપ્રદા ક્ષામા ક્ષૌમામ્બરધરા ક્ષયા ॥ ૧૨૪॥

ક્ષિતિઃ ક્ષીરપ્રિયા લક્ષ્મીઃ ક્ષિતિભૃત્તનયા ક્ષુધા ।
ક્ષત્રિયી બ્રાહ્મણી ક્ષેત્રા ક્ષપા ક્ષઃ બીજમણ્ડિતા ॥ ૧૨૫॥

ળક્ષઃ બીજસ્વરૂપાચ ક્ષકારાક્ષરમાતૃકા ।
દુર્ગન્ધનાશિની દૂર્વા દુર્ગમા દુર્ગવાસિની ॥ ૧૨૬॥

દુર્ગા દુર્ગાર્તિશમની ૐ હ્રીં દુમ્બીજમણ્ડિતા ।

ઇતિ નામસહસ્રં તુ મન્ત્રગર્ભં મહાફલમ્ ॥ ૧૨૭॥

દુર્ગાયા દુર્ગતિહરં સર્વદેવનમસ્કૃતમ્ ।
સર્વમન્ત્રમયં દિવ્યં દેવદાનવપૂજિતમ્ ॥ ૧૨૮॥

શ્રેયસ્કરં મહાપુણ્યં મહાપાતકનાશનમ્ ।
યઃ પઠેત્ પાઠયેદ્વાપિ શ◌ૃણોતિ શ્રાવયેદપિ ॥ ૧૨૯॥

સમહાપાતકૈર્મુક્તો દેવદાનવસેવિતઃ ।

ઇહ લોકે શ્રિયં ભુક્ત્વા પરત્ર ત્રિદિવં વ્રજેત્ ॥ ૧૩૦॥

દુર્ગાનામસહસ્રં તુ મૂલમન્ત્રૈકસાધનમ્ ।
અર્ધરાત્રે પઠેદ્ધીરો મધુરસ્મયસેવિતઃ ॥ ૧૩૧॥

ત્રિવારં વર્મપૂર્વં તુ ભવેદ્વાગીશસન્નિભઃ ।
યઃ પઠેદ્ દેવિ મધ્યાહ્ને સ્રીયુતો મુક્તકુન્તલઃ ॥ ૧૩૨॥

તસ્ય વૈરિકુલં ત્રસ્યેદ્ દર્શનાદ્ દૈત્યસૂદિનિ ।
દહનાદિવ દેવેશિ પતઙ્ગકુલમદ્રિજે ॥ ૧૩૩॥

યઃ પઠેદ્વેતસીમૂલે સાયં પૂજિતભૈરવઃ ।
તસ્યાસ્યકુહરાદ્ વાણી નિઃસરેદ્ગદ્યપદ્યભાક્ ॥ ૧૩૪॥

યઃ પઠેત્ સતતં દેવિ શયને સ્ત્રીરતાકુલઃ ।
સ ભવેદ્વૈરિવિધ્વંસી ધનેન ધનદોપમઃ ॥ ૧૩૫॥

વાગ્ભિર્વાગીશસદૃશઃ કવિત્વેન સિતોપમઃ ।
તેજસા સૂર્યસઙ્કાશોયશસા શશિસન્નિભઃ ॥ ૧૩૬॥

બલેન વાયુતુલ્યોઽપિલક્ષ્મ્યા ગીર્વાણનાયકઃ ।
દેવિ કિં બહુનોક્તેન સ ભવેદ્ભૈરવોપમઃ ॥ ૧૩૭॥

સ્તમ્ભનાકર્ષણોચ્ચાટ-વશીકરણકક્ષમઃ ।
રવૌ ભૂર્જે લિખેદ્ દેવિ નિશીથે વાષ્ટગન્ધકૈઃ ॥ ૧૩૮॥

સસ્તન્યરેતોરાજસ્કૈઃ સાધકો મન્ત્રસાધકઃ ।
લિખિત્વા વેષ્ટયેન્નામસહસ્રમણિમીશ્વરિ ॥ ૧૩૯॥

શ્વેતસૂત્રેણ સંવેષ્ટ્ય લાક્ષયા પરિવેષ્ટયેત્ ।
સુવર્ણરજતાદ્યૈશ્ચ વેષ્ટયેત્ પીતસૂત્રકૈઃ ॥ ૧૪૦॥

સમ્પૂજ્ય ગુટિકાં દેવિ શુભેઽહ્નિસાધકોત્તમઃ ।
ધારયેન્મૂર્ધ્નિ વા બાહૌ ગુટિકાં કામદાયિનીમ્ ॥ ૧૪૧॥

રણે રિપૂન્ વિજિત્યાશુ કલ્યાણીગૃહમાવિશેત્ ।
વન્ધ્યા વામભુજે ધૃત્વા કૃત્વા સાધકપૂજનમ્ ॥ ૧૪૨॥

પુત્રાન્ લભેન્મહાદેવિ સાક્ષાદ્વૈશ્રવણોપમાન્ ।
ગુટિકૈષા મહાદિવ્યા ગોપ્યા કામફલપ્રદા ॥ ૧૪૩॥

સાધકૈઃ સતતં પૂજ્યા સાક્ષાદ્દુર્ગાસ્વરૂપિણી ।
યોઽર્ચયેત્ સાધકો દુર્ગાં ગુટિકાં ધારયેત્ પ્રિયે ॥ ૧૪૪॥

પઠેદ્ધર્મં શિવે મન્ત્રનામસાહસ્રિકીં પરામ્ ।
અઙ્ગસ્તોત્રં ફલં તસ્ય દેવિ વક્ષ્યેઽધુના શ‍ૃણુ ॥ ૧૪૫॥

વને રાજકુલે વાપિ દુર્ભિક્ષેશત્રુસઙ્કટે ।
અરણ્યે પ્રાન્તરે દુર્ગે શ્મશાને સિન્ધુસઙ્કટે ॥ ૧૪૬॥

વાત્યે યક્ષપિશાચાદિભૂતપ્રેતભયે તથા ।
વીરો વિગતભીર્દેવિ સર્વત્ર વિજયી ભવેત્ ॥ ૧૪૭॥

સ્તમ્ભયેદ્વાતસૂર્યામ્બુચન્દ્રાદીન્ સાધકોત્તમઃ ।
મોહયેત્ ત્રિજગત્ સદ્યઃ કાન્તાશ્ચાકર્ષયેદ્ ધ્રુવમ્ ॥ ૧૪૮॥

મારયેદખિલાઞ્છત્રૂ નુચ્ચાટયતિ વૈરિણઃ ।
વશયેદ્ દેવતાઃ સદ્યઃ કિં પુનર્માનવાંશ્છિવે ॥ ૧૪૯॥

શમયેદખિલાન્ રોગાન્ મહોત્પાતાનુપદ્રવાન્ ।
કિં કિં ન લભતે વીરો દુર્ગાઞ્ચાઙ્ગપૂજનાત્ ॥ ૧૫૦॥

ઇદં રહસ્યં દુર્ગાયા અષ્ટાક્ષર્યા મહેશ્વરિ ।
સર્વસ્વંસારતત્ત્વઞ્ચ મૂલવિદ્યામયં પરમ્ ॥ ૧૫૧॥

મહાચીનક્રમસ્થાનાં સાધકાનાં યશસ્કરમ્ ।
પઠેત્ સમ્પૂજયેદ્દેવ્યા મન્ત્રનામસહસ્રકમ્ ॥ ૧૫૨॥

ઇદં સારં હિ તન્ત્રાણાં તત્ત્વાનાં તત્ત્વમુત્તમમ્ ।
દુર્ગાનામસહસ્રં તુ તવ ભક્ત્યા પ્રકાશિતમ્ ॥ ૧૫૩॥

અભક્તાય ન દાતવ્યં ગોપ્તવ્યં પશુસઙ્કટે ।
અભક્તેભ્યોઽપિ પુત્રેભ્યો દત્ત્વા નરકમાપ્નુયાત્ ॥ ૧૫૪॥

દીક્ષિતાય કુલીનાય ગુરુભક્તિરતાય ચ ।
શાન્તાય ભક્તિયુક્તાય દેયં નામસહસ્રકમ્ ॥ ૧૫૫॥

વિન દાનં ન ગૃહ્ણીયાન્ન દદ્યાદ્ દક્ષિણાં વિના ।
દત્ત્વા ગૃહીત્વાપ્યુભયોઃ સિદ્ધિહાનિર્ભવેદ્ ધ્રુવમ્ ॥ ૧૫૬॥

ઇદં નામસહસ્રં તે ગુપ્તં ગોપ્યતમં શિવે ।
તત્ત્વં ભક્ત્યા મયાખ્યાતં ગોપનીયં સ્વયોનિવત્ ॥ ૧૫૭॥

ઇતિ શ્રીરુદ્રયામલાન્તર્ગતં શ્રીદુર્ગાસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Manish Gavkar

---

*Shri Durga Sahasranama Stotram*

pdf was typeset on June 26, 2022

Please send corrections to *sanskrit@cheerful.com*